# common shlokas used for recitation - set 2

# શ્લોક સંગ્રહ ૨

## Document Information

```
Text title : shloka saNgraha 2
File name : shloka2.itx
Category : misc, shloka
Location : doc_z_misc_general
Latest update : 1996
Send corrections to : Sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# શ્લોક સંગ્રહ ૨

સરસ્વતી નમસ્તુભ્યં વરદે કામરૂપિણિ ।
વિદ્યારમ્ભં કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥

Oh Goddess Sarasvati, my humble prostrations unto
Thee, who are the fulfiller of all my wishes.
I start my studies with the request that Thou wilt
bestow Thy blessings on me .

આકાશાત્ પતિતં તોયં યથા ગચ્છતિ સાગરમ્ ।
સર્વદેવનમસ્કારાન્ કેશવં પ્રતિગચ્છતિ ॥

દીપજ્યોતિઃ પરબ્રહ્મ દીપજ્યોતિર્જનાર્દનઃ ।
દીપો હરતુ મે પાપં દીપજ્યોતિર્નમોઽસ્તુતે ॥

ગણનાથસરસ્વતીરવિશુક્રબૃહસ્પતીન્ ।
પંચૈતાન્ સંસ્મરેન્નિત્યં વેદવાણીપ્રવૃત્તયે ।

સુમુખશ્ચ એકદંતશ્ચ કપિલો ગજકર્ણકઃ ।
લમ્બોદરશ્ચ વિકટો વિઘ્નનાશો ગણાધિપઃ ॥

ધૂમ્રકેતુર્ગણાધ્યક્ષો ભાલચન્દ્રો ગજાનનઃ ।
દ્વાદશૈતાનિ નામાનિ યઃ પઠેચ્છૃણુયાદપિ ॥

વિદ્યારમ્ભે વિવાહે ચ પ્રવેશે નિર્ગમે તથા ।
સંગ્રામે સંકટે ચૈવ વિઘ્નસ્તસ્ય ન જાયતે ॥

શુક્લામ્બરધરં દેવં શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

સર્વદા સર્વકાર્યેષુ નાસ્તિ તેષામમઙ્ગલમ્ ।
યેષં હૃદિસ્થો ભગવાન્ મઙ્ગલાયતનં હરિઃ ॥

તદેવ લગ્નં સુદિનં તદેવ
તારાબલં ચંદ્રબલં તદેવ ।
વિદ્યાબલં દૈવબલં તદેવ
લક્ષ્મીપતે તેંઽઘ્રિયુગં સ્મરામિ ॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
બુદ્ધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યદ્ સકલં પરસ્મૈ
નારાયણાયેતિ સમર્પયામિ ॥

હરિર્દાતા હરિર્ભોક્તા હરિરન્નં પ્રજાપતિઃ ।
હરિઃ સર્વઃ શરીરસ્થો ભુઙ્ક્તે ભોજયતે હરિઃ ॥

કર્પૂરગૌરં કરુણાવતારં
સંસારસારં ભુજગેન્દ્રહારમ્ ।
સદા વસન્તં હૃદયારવિન્દે
ભવં ભવાનીસહિતં નમામિ ॥

॥ શ્રીરામાયણસૂત્ર ॥

આદૌ રામતપોવનાદિગમનં હત્વા મૃગં કાઞ્ચનમ્
વૈદેહીહરણં જટાયુમરણમ્ સુગ્રીવસમ્ભાષણમ્ ॥

વાલીનિર્દલનં સમુદ્રતરણં લઙ્કાપુરીદાહનમ્
પશ્ચાદ્રાવણકુમ્ભકર્ણહનનં એતદ્ધિરામાયણમ્ ॥

॥ શ્રીભાગવતસૂત્ર ॥

આદૌ દેવકિદેવિગર્ભજનનં ગોપીગૃહે વર્ધનમ્
માયાપૂતનજીવિતાપહરણં ગોવર્ધનોદ્ધારણમ્ ॥

કંસચ્છેદનકૌરવાદિહનનં કુંતીસુતાં પાલનમ્
એતદ્ભાગવતં પુરાણકથિતં શ્રીકૃષ્ણલીલામૃતમ્ ॥

॥ ગીતાસ્તવ ॥

પાર્થાય પ્રતિબોધિતાં ભગવતા નારાયણેન સ્વયમ્
વ્યાસેનગ્રથિતાં પુરાણમુનિના મધ્યે મહાભારતે
અદ્વૈતામૃતવર્ષિણીં ભગવતીમષ્ટાદશાધ્યાયિનીમ્

અમ્બ ત્વામનુસન્દધામિ ભગવદ્ગીતે ભવેદ્વેષિણીમ્ ॥

સર્વોપનિષદો ગાવો દોગ્ધા ગોપાલનન્દનઃ ।
પાર્થો વત્સઃ સુધીર્ભોક્તા દુગ્ધં ગીતામૃતં મહત્ ॥

॥ વ્યાસસ્તુતી ॥

નમોઽસ્તુ તે વ્યાસ વિશાલબુદ્ધે ફુલ્લારવિન્દાયતપત્રનેત્ર ।
યેન ત્વયા ભારતતૈલપૂર્ણઃ પ્રજ્વાલિતો જ્ઞાનમયપ્રદીપઃ ॥

વ્યાસાય વિષ્ણુરૂપાય વ્યાસરૂપાય વિષ્ણવે ।
નમોવૈ બ્રહ્મનિધયે વાસિષ્ઠાય નમોનમઃ ॥

॥ શ્રીદત્તગુરુધ્યાનમ્ ॥

બ્રહ્માનંદં પરમસુખદં કેવલં જ્ઞાનમૂર્તિં
દ્વંદ્વાતીતં ગગનસદૃશં તત્ત્વમસ્યાદિલક્ષ્યમ્ ।
એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતં
ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરું તં નમામિ ॥

યં બ્રહ્માવરુણેન્દ્રરુદ્રમરુતઃ સ્તુવન્તિ દિવ્યૈઃ સ્તવૈઃ
વેદૈઃ સાઙ્ગપદક્રમોપનિષદૈઃ ગાયન્તિ યં સામગાઃ ।
ધ્યાનાવસ્થિતતદ્ગતેન મનસા પશ્યન્તિ યં યોગિનો
યસ્યાન્તં ન વિદુઃ સુરાસુરગણા દેવાય તસ્મૈ નમઃ ॥

મૂકં કરોતિ વાચાલં પઙ્ગું લઙ્ઘયતે ગિરિમ્ ।
યત્કૃપા તમહં વન્દે પરમાનન્દમાધવમ્ ॥

શ્રીકેશવાય નમઃ । નારાયણાય નમઃ । માધવાય નમઃ ।
ગોવિંદાય નમઃ । વિષ્ણવે નમઃ । મધુસૂદનાય નમઃ ।
ત્રિવિક્રમાય નમઃ । વામનાય નમઃ । શ્રીધરાય નમઃ ।
હૃષીકેશાય નમઃ । પદ્મનાભાય નમઃ । દામોદરાય નમઃ ।
સંકર્ષણાય નમઃ । વાસુદેવાય નમઃ । પ્રદ્યુમ્નાય નમઃ ।
અનિરુદ્ધાય નમઃ । પુરુષોત્તમાય નમઃ । અધોક્ષજાય નમઃ ।
નારસિંહાય નમઃ । અચ્યુતાય નમઃ । જનાર્દનાય નમઃ ।
ઉપેન્દ્રાય નમઃ । હરયે નમઃ । શ્રીકૃષ્ણાય નમઃ ।

॥ દેવતાવંદનમ્ ॥

શ્રીમન્મહાગણાધિપતયે નમઃ ।

શ્રી સરસ્વત્યૈ નમઃ । શ્રીગુરવે નમઃ ।
શ્રીમાતાપિતૃભ્યાં નમઃ ।
શ્રીલક્ષ્મીનારાયણાભ્યાં નમઃ ।
શ્રીઉમામહેશ્વરાભ્યાં નમઃ ।
ઇષ્ટદેવતાભ્યો નમઃ । કુલદેવતાભ્યો નમઃ ।
સ્થાનદેવતાભ્યો નમઃ । વાસ્તુદેવતાભ્યાં નમઃ ।
સર્વેભ્યો દેવેભ્યો નમો નમઃ ॥ અવિઘ્નમસ્તુ ॥

॥ ૐ તત્સત્ ઇતિ ॥

---

*common shlokas used for recitation - set 2*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*